भवे त्रि० स्त्रियां ङीप् । "घकालेत्यादिना" पा० सप्तम्या वा अलुकि अपराह्णेतनोऽप्युक्तार्थे त्रि०। [अश्रुते च ।

**अपरिकलित** त्रि० न परिकलितः न०त० । अज्ञाते, अदृष्टे,

**अपरिक्रम** त्रि० नास्ति परिक्रमः उद्योगोयस्य । अनुद्युक्ते । "जानन्नपि च किं कुर्य्यादशक्तस्त्वपरिक्रम इति" स्मृतिः । परितः क्रमः क्रमणम् अभावार्थे न०त० । परितः क्रमणाभावे पु० । परिगतः क्रमम् न० त० । क्रमापरिगते अपरपाटीके त्रि० ।

**अपरिक्लिष्ट** त्रि० क्लिश भावे क्त न परिक्लिष्टं क्लेशोयत्र । अनायाससाध्ये । कर्त्तरि क्त न०त०। क्लेशयुक्तभिन्ने त्रि० ।

**अपरिगत** त्रि० न०त० । ज्ञातभिन्ने, अप्राप्ते च ।

**अपरिगृहीत** त्रि० न०त०। अस्वीकृते, अगृहीते, अज्ञाते च

**अपरिग्रह** पु० अभावे न०त० । परिग्रहाभावे, पातञ्जलोक्ते यमभेदे च यथा "अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः" "सू० तत्रापरिग्रहो नाम देहयात्रानिर्वाहकातिरिक्तभोगसाधनधनाद्यनङ्गीकारः । तस्य फलमपि तत्रैव दर्शितम् यथा "अपरिग्रहस्थैर्य्ये जन्मकथन्तासंबोधः" अपरिग्रहशीलस्य तत्स्थैर्य्ये सति किंरूपं जन्म किंप्रकारकं, किंहेतुकं, किंफलकम्, किमवसानमिति शरीरस्यापि परिग्रहविरोधिनी जिज्ञासा भवति शरीरस्यापि परिग्राहत्वाविशेषात्कथं तत्परिग्रहो न स्यादिति जिज्ञासावश्यम्भावात् । ततः कार्य्यकरणसंबन्धात् पुरुषस्यात्मस्य जन्म देवनरतिर्य्यक्त्वप्रकारम् । क्लेशकर्म्महेतुकं, दुःखैकफलकम्,पुरुषतत्त्वावसानमित्याचार्य्यादागमतस्य निश्चित्य अदेहः सन्नपरिग्रहयमस्य परमां काष्ठामनुभवतीत्यर्थः" इति तद्भा० । "लोभस्य पुरतः कोऽसौ ? सत्यास्तेयापरिग्रहा" इति प्र०च०। नास्ति देहयात्रानिर्व्वाहकव्यतिरिक्तस्य परिग्रहः संग्रहो यस्य । परिव्राजके "निराशीरपरिग्रह" इति गीता । तस्य च कौपीनादिपरिग्रहणेऽपि तस्य शरीरयात्रानिर्वाहकत्वान्न क्षतिः "कौपीनाच्छादनार्थं हि वासोवै बिभृयाद्यतिः । योगसम्भारभेदांश्च गृह्णीयात् पादुके तथेति" स्मृतौ तत्परिग्रहविधानात् । [पूर्व्वमज्ञाते च ।

**अपरिचित** त्रि० परि+चि–क्त न०त० । अनुशीलितभिन्ने,

**अपरिच्छद** त्रि० न परिच्छदोयस्य अप्राशस्त्ये न०ब० । अपकृष्टवस्त्राद्युपकरणयुक्ते दरिद्रे ।

**अपरिच्छन्न** त्रि० परिच्छन्नः परिष्कृतः न०त० । अपरिष्कृते, मार्ज्जनशुद्ध्यादिरहिते ।

**अपरिच्छिन्न** न० न परिच्छिन्नः । इयत्तारहिते निःसीमनि कूटस्थे चैतन्यात्मके ब्रह्मणि "तदेतद्ब्रह्मापूर्व्वमनपरमनन्तमिति" छ०उ०श्रुत्या तस्यान्तराहित्योक्तेस्तथात्वम् इयत्तारहितमात्रे त्रि० "जगत्यपर्य्याप्तेत्यादि" भाष्यव्याख्यायामपर्य्याप्तः अपरिच्छन्न" इति मल्लि० ।

**अपरिच्छेद** पु० अभावार्थे न० ! परिच्छेदाभावे इयत्ताभावे । न०ब० । इयत्ताशून्ये त्रि० । [तच्छून्ये त्रि० ।

**अपरिज्ञान** न० अभावे न०त०। तत्त्वविवेकाभावे। न०ब०।

**अपरिणत** त्रि० परि+नम–क्त न०त० । अपरिपक्वे । यस्य यथा परिणाम उचितस्तथात्वमप्राप्ते अन्यरूपतामप्राप्ते च ।

**अपरिणय** पु० परिणयो विवाहः अभावे न०त० । विवाहाभावे । [हीने कौमारावस्थायुक्ते ।

**अपरिणीत** त्रि० परि+नी–क्त न०त० । विवाहसंस्कार-

**अपरितोष** पु० अभावे न०त० । सन्तोषाभावे ।

**अपरिपक्व** त्रि० न०त० । परिपक्वभिन्ने यस्य यथा परिणतिरुचिता तथारूपतामप्राप्ते, "यथा अपरिपक्वयोगीति" । विक्लित्तिप्राप्तिशून्ये आमे तण्डुलफलादौ च ।

**अपरिमाण** न० अभावे न०त० । परिमाणाभावे इयत्ताराहित्ये न०ब० । तच्छून्ये त्रि० ।

**अपरिमित** त्रि० न०त० । इयत्ताशून्ये परिमाणशून्ये ।

**अपरिमेय** त्रि० परिमातुं योग्यः न०त० । परिमातुमयोग्ये इयत्तारहिते ।

**अपरिम्लान** पु० न परिम्लायति कर्त्तरि क्त । रक्तवर्णे (आयला) ख्याते महासहाह्वये रा०नि०। तस्य बहुमर्द्दनेऽपि म्लानिराहित्यात् तथात्वम् । म्लानिवर्जिते त्रि० ।

**अपरिविष्ट** त्रि० परि+विष–कर्म्मणि क्त न०त० । वेष्टनशून्ये अव्याप्ते । "उर्ज्जयन्त्या अपरिविष्टमास्यमिति" ऋ० २, १३,८ । अपरिविष्टं मलादिभिरव्याप्तमिति" भा० । विष्टमाहारार्थमुपहृतं न०त० । परिवेषणशून्ये भोजपरिनार्थमनुपढौकिते त्रि० ।

**अपरिवृत** त्रि० न परिवृतः । अनाच्छादिते । परितोवेष्टनरहिते अनावृते क्षेत्रादौ "तत्रापरिवृतं शस्यं विहिंस्युः पशवोयदीति" मनुः क्षेत्राद्यावरणप्रकारोऽपि तेन दर्शितः "वृतिं तत्र प्रकुर्व्वीत यामुष्ट्रोनावलोकयेत् छिद्रञ्च वारयेत् सर्वं श्वशूकरमुखानुगमिति" तेन तादृशच्छिद्रहीनवरणशून्येऽपि अपरिवृतत्वम् असंसृष्टे च "महोभिरपरीवृतो वसति प्रचेताः" ऋ० २,१०,३, अपरीवृतोऽसंसृष्टः इति भा० वेदे दीर्घः । [राहित्ये। न०ब०। इयत्ताशून्ये त्रि०।

**अपरिशेष** पु० अभावे न०त० । परिशेषाभावे इयत्ता-